ृत्वा जीवत्पितृकस्य होमान्तमित्यत्रोपपत्तिमाह" कर्कः। "न व्यवेते जातूकर्ण्यौ न जीवन्तमति ददातीति" सू० । "जीवत्पितृकस्य होमान्तकर्म्म कुर्वतः यतोजातूकर्ण्य आचार्य्यौ न व्यवेते जीवता पित्रा व्यवहिते पितामहादौ पिण्डदानं न भवतीत्याह कुतो न भवतीत्यत्र हेतुः 'न जीवन्तमति ददातीति" शाखान्तरे श्रवणात् अतःप्रधाने पिण्डदाने जीवत्पितृकस्य निषिद्धे अनारम्भ एव घटते न होमान्तता । आपस्तम्बः "यदि जीवत्पिता न दद्यादा होमात् कृत्वा विरमेदिति" मानवे च "यदि दद्याद्येभ्य एव पिता दद्यात्तेभ्यो दद्यादिति" काठके "पितापुत्रौ चेदाहिताग्नी स्यातां येभ्यः पिता तेभ्यः पुत्रो दद्यात् पिता प्रेतः स्यात् पितामहो जीवेत् पित्रे पिण्डं निधाय पितामहात्पराभ्यां द्वाभ्यां दद्यादिति" कर्क० जीवपुत्रोऽप्यत्र । समासान्तविधेरनित्यत्वात् न कप् । जीवपितृ इत्यपि तत्रार्थे ।

**जीवथ** पु० जीव—अथ । १कूर्मे २प्राणे ३मयूरे ४मेघे च ५चिरायुष्के ६धार्म्मिके च७जीवनवति त्रि०। उणादिको०

**जीवद** पु० जीवं जीवनं ददाति द्यति वा दा—दो—वा क । १वैद्ये २रिपौ ३मन्थिपर्णवृक्षे च मेदि० ४जीवनदातरि त्रि० । ५जीवन्तीवृक्षे स्त्री राजनि० ।

**जोवदातृ** त्रि० जीवं ददाति दा—तृच् । १जीवनदायिनि स्त्रियां ङीप् सा च २ऋद्धिनामौषधौ ३जीवन्तीवृक्षे च राजनि० ।

**जीवदानु** त्रि० जीवं ददाति दा—बा० नु । १जीवनदातरि "विरिप्सच्चुदादाय पृथिवीं जीवदानुम्" यजु० १।२८।

**जीवदृष्टा** स्त्री जीवाय जीवनाय दृष्टा । जीवन्तीवृक्षे राजनि०

**जीवधन** न० जीव एव धनम् । गवादिजन्तुरूपे धने त्रिका०

**जीवधानी** स्त्री जीवा धीयन्तेऽस्याम् धा+अधि—करणे ल्युट् ङीप्। पृथिव्याम् । "ददर्श गां तत्र सुषुप्सुरग्रे यां जीवधानीं स्वयमभ्यधत्त" भाग० २।१३।२। 'जीवधानीं सर्वजीवाधारभूतां महीम्" श्रीधरः ।

**जीवन** न० जीव—भावे ल्युट् । १वृत्तौ २प्राणधारणे । करणे ल्युट् । ३जले मेदि० । जलं विना प्राणधारणासम्भवात्तस्य जीवनकारणत्वम् अत एव "अन्नमयं हि सौम्य ! मन आपोमयः प्राणः" छान्दोग्ये प्राणानां जलमयत्वमुक्त्वा तस्य तथात्वं समर्थितं यथा ।

"आपः पीतास्त्रेधा विधीयन्ते तासां यः स्थविष्ठो धातुस्तन्मूत्रं भवति यो मध्यमस्तल्लोहितं योऽणिष्ठः स प्राणः" "अपां सौम्य ! पीयमानानां योऽणिमा स ऊर्द्ध्वः समुदीषति स प्राणो भवति" "षोड़शकलः सौम्य ! पुरुषः पञ्चदशाहानि माशीः काममपः पिबापोमयः प्राणो, न पिब्रतो विच्छेत्स्यते" इति छा०उ०।४जीवनसाधने त्रि० "सर्वोऽर्च्यो जीवनः पाता" मुग्धबो०।५हैयङ्गवीने शब्दच०। सद्योहतस्यायुर्वृद्धिकरत्वेन जीवनहेतुत्वात् तथात्वम् । ६मज्जनि राजनि०७वाते८जीवकौषधौ च पु०राजनि०। ९क्षुद्रफलवृक्षे पु० शब्दच० । १०पुत्रे पु०हेमच०। जीवयति जीव—णिच्—कर्त्तरि—ल्यु । ११परमेश्वरे पु० "वीरहा रक्षणः सन्तो जीवनः पर्य्यवस्थितः"विष्णु स० । "सर्वाः प्रजाः प्राणरूपेण जीवयन् जीवनः" भा० । "प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम्" भाषा० "जीवनं जीवनं हन्ति प्राणान् हन्ति समीरणः । किमाश्चर्य्यं शारदेशे प्राणदा यमदूतिका" उद्भटः । वृत्तौ १२जीविकायाम् । "कृषिः शिल्पं भृतिर्विद्या कुसीदं शकटं गिरिः । सेवा रूपं नृपो भैक्ष्यमापत्तौ जीवनानि तु" याज्ञ० "विद्या शिल्पं भृतिः सेवा गोरक्षं विपणिः कृषिः । धृतिभैक्ष्यं कुसीदञ्च दश जीवनहेतवः" मनुः । १३जीवदातरि "शीतस्तत्र ववौ वायुः सुगन्धिं जीवनः शुचिः" भा० व० १६८ अ० ।

**जीवनक** न० जीवन+संज्ञायां कन् । अन्ने हेमच० । कलौ प्राणस्यान्नगतत्वोक्त्या तस्य तथात्वम् ।

**जीवनयोनि** स्त्री ६त० । न्यायोक्ते देहे प्राणसञ्चारकारणे अतीन्द्रिये १यत्नभेदे । "यत्नो जीवनयोनिस्तु सर्वदातीन्द्रियो भवेत् । शरीरे प्राणसञ्चारकारणं परिकीर्त्तितम्" भाषापरि० । "जीवनयोनिर्यत्नो यावज्जीवनमनुवर्त्तते स चातीन्द्रियः । तत्र प्रमाणमाह शरीरे प्राणसञ्चारकारणं परिकीर्त्तितमिति । प्राणसञ्चारो हि अधिकः श्वासादिः प्रयत्नतः साध्यः । इत्यञ्च प्राणसञ्चारस्य यत्नसाध्यत्वानुमानात् प्रत्यक्षयत्नस्य बाधाच्चातीन्द्रिययत्नसिद्धिः । स एव जीवनयोनिप्रयत्नः" मुक्ता०

**जीवना** स्त्री जीवयति जीव—णिच्—ल्यु । मेदोषधौ मेदि० ।

**जीवनाघात** न० जीवनस्याघातो यस्मात् । विषे शब्दच० ।

**जीवनावास** पु० जीवनं जलमावासोऽस्य । वरुणे शब्दच० । ६त० । २प्राणायतने देहे च ।

**जीवनी** स्त्री जीवत्यनेन जीव—करणे ल्युट् ङीप् । १काकोल्यां २डोड्यां ३मेदायां ४महामेदायां ५जीवन्त्याञ्च